बा० अकर्म्माख्यायामपि असुन् नुट् ह्रस्वश्च । २ प्राप्तव्ये, "यच्चित्रमप्न उषसो वहन्त" ऋ० १,११३,२० । "अप्रः प्राप्तव्यम्" भा० ।

**अप्नस्वत्** त्रि० अप्नस्+अस्त्यर्थे मतुप् मस्य वः स्त्रियां ङीप् । कर्मयुक्ते । "अप्नस्वतीषुर्वराखिति" ऋ० १,१२७,६ । "अप्नस्वतीषु खननादिकर्म्मोपेतासु" भा० ।

**अप्पति** पु० अपां पतिः ६त० । १वरुणे २समुद्रे च । "इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यो बलिं हरेत्" इति "वित्ताप्पत्योर्यमस्य च" इति च मनुः ।

**अप्पित्त** न० अपां पित्तमिव हेतुत्वात् । १ अग्नौ "अग्नेरापः" इति श्रुतौ अग्नेर्जलहेतुत्वोक्तेस्तथात्वम् ।

**अप्य** त्रि० अपामिदम् तत्र साधु संस्कृतं वा यत् । १जलसंस्कृते "अप्येगो राजाप्यस्तमिष्यते" ऋ० ८,८६,४५ । "अप्यः अप्सु संस्कृतः" भा० जलसम्बन्धिनि "त्वयाहितमप्यमप्सु भागम्" ऋ० २,३८,७ । "अप्यमपां सम्बन्धिनम्" भा० । ३कर्मणि साधौ "स ईं वृषो अप्योवनर्गुरुप" ऋ० १, १४५,५ । "अप्यः कर्मणि साधुः" भा० अप्नं योग्यं वेदे यत् ह्रस्वश्च । ४प्राप्ते योग्ये "योनिमप्यमनिश्रितम्" ऋ० २,३८,८ । "अप्यम् आप्तं योग्यम्" भा० ।

**अप्यय** पु० अप+इण–भावे अच् । १ "अपगमने २ नाशे ३ विलये च "स्वाप्ययादिति शा०सू० भवाप्ययौ हि भूतानां श्रुतौ विस्तरशोमया" गीता । अपैत्यस्मात् अपादाने अच् । पक्षपुच्छसन्धिषु "पक्षपुच्छानि पराग्भिरप्ययेषु" कात्या० १७,६,७, "अप्ययेषु पक्षपुच्छाग्रसन्धिषु" वेददी० ।

**अप्रकट** त्रि० न प्रकाशः विरोधे न०त० । प्रकाशितभिन्ने गुप्ते । "प्रकटाऽप्रकटा चेति लीला सेयं हरेर्द्विधा प०पु०

**अप्रकम्प** पु० न प्रकम्पः अभावे न०त० । १ चलनाभावे न० ब० । २चलनहीने त्रि० "अप्रकम्पो दुराधर्ष" इति पुरा० ।

**अप्रकर्ष** पु० न प्रकर्षः विरोधे न०त० । १ अपकर्षे न०ब० । २ प्रकर्षशून्ये त्रि० ।

**अप्रकाण्ड** पु० न प्रकृष्टः काण्डः स्कन्धोऽस्य । १ स्कन्धशून्ये भिण्टीप्रभृतिवृक्षे । न०त० । २प्रकाण्डभिन्ने स्तम्बे त्रि०

**अप्रकाश** पु० न प्रकाशः अभावे न०त० । प्रकाशाभावे गोपने "अप्रकाशक्रये क्रेतुः स्वामिनश्चाप्यरक्षणादिति" प्रा०त०ना० । न०ब० । "प्रकाशशून्ये त्रि० "प्रकाशांश्चाप्रकाशांश्च तस्करान् द्विविधान् विदुः" मनुः । अप्रकाशचौराश्च अपहर्तृशब्दे मनूक्ताः १५४ पृष्ठे दृश्याः । "प्रकाशश्चाप्रकाशश्च लोकालोक इवाचल" इति रघुः ।

**अप्रकाश्य** त्रि० प्र+काश–णिच् अर्हार्थे कर्म्मणि यत् । १ प्रकाशयितुमनर्हे गोप्ये "अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित्" तन्त्रम् । २ विशेषतो गोप्ये जन्मर्क्षादिनवके च तच्च । "जन्मर्क्षं मैथुनं मन्त्रो गृहच्छिद्रञ्च वञ्चनम् । आयुर्धनापमानं स्त्री न प्रकाश्यानि सर्वथा" का०ख० ।

**अप्रकृत** त्रि० न प्रकृतः प्रक्रान्तः यथार्थो वा । १अप्रक्रान्ते २अयथार्थे च । प्रकृतिः स्वभावोऽस्त्यस्य अर्श० आ० अच् न०त० । भयादिना ३स्वभावहीने । "तामसं यच्चाप्रकृतो ददातीति शु०त० हारी० "अप्रकृतो भयादिमान्" रघुनन्दनः ।

**अप्रकृति** स्त्री न प्रकृतिः । प्रकृतिभिन्ने कार्य्यकारणभिन्ने सांख्यप्रसिद्धे पुरुषे "न प्रकृतिर्न विकृतिः पुरुष" इति सां०का० उक्तेस्तस्य प्रकृतिभिन्नत्वात्तथात्वम् २ व्याकरणोक्ते प्रत्ययनिमित्तरूपप्रकृतिभिन्ने प्रत्ययादिशब्दे, मीमांसकोक्तायां ३ प्रकृतिभिन्नायां विकृतौ च । प्रकृतिः स्वभावः न० ब० । ४ तच्छून्ये त्रि० वा कप् । अप्रकृतिकोऽप्यत्र ।

**अप्रकृतिस्थ** त्रि० प्रकृतौ स्वभावे न तिष्ठति रोगभयादिना ततश्चलति स्था–क ७त० न०त० । रोगभयादिना स्वभावाच्चलिते ।

**अप्रकृष्ट** त्रि० न प्रकृष्टः विरोधे न०त० । निकृष्टे अपकर्षयुक्ते

**अप्रक्लृप्त** त्रि० प्र+क्लृप्–क्त न०त० । क्लृप्तभिन्ने यदुचितं तद्भिन्ने "ऋत्विजां वैकोऽप्रक्लृप्तत्वाच्छामित्रे कात्या०६,७,२

**अप्रचित** त्रि० प्र+चि–भावे क्त "अस्यदर्थे" पा० उक्तेः भावकर्मणोश्च स्यदर्थतया तद्भिन्ने दीर्घविधानात् भावस्य च स्यदर्थतया न दीर्घः तेन न नत्वम् नास्ति प्रचितं प्रचयो यस्य । प्रचयरहिते "अप्रचितं वसु बिभर्षि" ऋ० १,५५,८ । [स्वृद्धुत्ववति ।

**अप्रखर** त्रि० न प्रखरः विरोधे न०त० । १ तीक्ष्णत्वविरोधि

**अप्रगुण** त्रि० न प्रकृष्टो गुण उपकरणं कार्य्यसामर्थ्यं वा यस्य । १ व्याकुले न०त० । २ अनुगुणभिन्ने च ।

**अप्रचेतस्** न० न प्रचेतति प्र+चित–असुन् न०त० । अज्ञाने "कथा विधात्यप्रचेताः" ऋ० १,१२०,१ ।

**अप्रज** पु० न प्रजायते आत्मजरूपेण प्र+जन–ड न०त० । पुत्रादिजननाभावेन अजाते १ वन्ध्ये "आत्मा वै जायते पुत्र" इति श्रुतेः पुत्रजनने आत्मजननात् तच्छून्यस्य तथात्वम् । "भ्रातृणामप्रजः कश्चित् म्रियेत प्रव्रजेत वेति" स्मृतिः "अप्रजस्त्रीधनं भर्त्तुर्ब्राह्मादिषु चतुर्ष्वपीति" या० । २पुत्ररहितायां स्त्रियां स्त्री "अप्रजायामतीतायां बान्धवा-